# द्वितीयः पाठः
# ''छत्तीसगढस्य प्रमुखपर्वाणि''

PSA1QT

मानवजीवने उत्सवानां महत्वं सर्वविदितमेव। छत्तीसगढराज्ये बहवः उत्सवाः प्रचलिताः। तेषु ''हरेली'', ''पोरा'', ''तीजा'', ''जवारा'', ''जेठौनी'', ''छेरछेरा पुन्नी'', इत्यादयः मुख्याः सन्ति। एतेषु –

**1. ''हरेली''** – इत्यस्य विशिष्टं महत्वमस्ति। श्रावणमासस्य अमावस्यायां ''हरेली'' उत्सवः भवति।वातावरणे सर्वत्र हरीतिमा लक्ष्यते। कृषकाः क्षेत्रेषु बीजवपनं कृत्वा सर्वाणि उपकरणानि संशोध्य पशूनां पूजनं कुर्वन्ति। पशूनां कृते गोधूमनिर्मितां रोटिकां पाचयन्ति। तण्डुलनिर्मिता चित्रापूपः (चीला) इति खाद्यपदार्थस्य सेवनं कुर्वन्ति जनाः। बालकाः काष्ठनिर्मितेन ''गेड़ी'' नामक्रीडोपकरणेन इतस्ततः विचरन्ति हर्षं च अनुभवन्ति।



**2. ''पोरा''** – भाद्रपदस्य अमावस्यायां पोरा (पोला) उत्सवः भवति। कृषि प्रधानस्य छत्तीसगढस्य अयं प्रधानः उत्सवः। कृषि कार्यं क्षेत्रकर्षणं च बलीवर्दाः कुर्वन्ति। अतः अस्मिन् उत्सवे बलीवर्दानां विशिष्टा सज्जा भवति। प्रतीकरुपेण बालकाः अपि मृण्मय (मिट्टीका) वृषभैः (नादिया बैल) क्रीडन्ति। बालिकाः ''फुगड़ी'' आदि क्रीडया स्वकीयमानन्दं प्रदर्शयन्ति। तीजापर्वणः अत्र विशेषं महत्वमस्ति। स्त्रियः स्वीयं मातृकुलं गत्वा परिवारजनैः सह सानन्दमुपोष्य पत्युः दीर्घायुष्यं कामयन्ति। व्रतस्य समापने नानाविधं व्यञ्जनं पचन्ति। ''ठेठरी'', ''खुरमी'' इति खाद्यपदार्थं परस्परं वितरन्ति। नानाविधानि वस्त्राभूषणानि परिधाय भगवतः पूजनं कृत्वा संतोषमनुभवन्ति। भाद्रपदस्य शुक्लतृतीयायां तिथौ उत्सवोऽयं भवति।



**3. ''जवारा''** – आश्विनमासस्य शुक्लपक्षे नवम्यां तिथौ देव्याः दुर्गायाः विसर्जनोत्सवः ''जवारा'' इत्युच्यते। अङ्कुरितान् यवान् आदाय समारोहपूर्वकं गीतवाद्यादिभिः देव्याः पूजनं कृत्वा तेषां विसर्जनं क्रियते। हरितवर्णाः यवाङ्कुराः समृद्धेः प्रतीकभूताः सन्ति।





**4. ''जेठौनी''**– देवप्रबोधनी एकादशी ''जेठौनी'' इति उच्यते। अस्मिन् पर्वणि सायङ्काले तुलसी विवाहः श्री विष्णुना सह समायोज्यते। गोपालकाः स्वकीय पशून् मयूरपिच्छादिना भूषयन्ति। कार्तिकपूर्णिमापर्यन्तम् उत्सवोऽयं प्रचलति।

**5. ''छेरछेरा पुन्नी''** – चातुर्मासस्य समाप्त्यनन्तरं पौषपूर्णिमायां सञ्चितधान्यं भाण्डारगृहात् आदाय आपणे विक्रयार्थं नीयते। अस्मिन् पर्वणि बालकाः प्रतिगृहं गत्वा ''छेरछेरा–छेरछेरा–कोठी के धान ल हेर–हेरा'' ''जबे देबे तबे टरब'' इति लोकभाषायां कथयन्तः नवान्नानि याचन्ते। ग्राम्यबालिकाः मध्ये शुकं स्थापयित्वा अभितः नृत्यन्ति शुकगीतं गायन्ति च। छत्तीसगढक्षेत्रस्य ग्रामे–ग्रामे मेलापकाः (मंडई) आयोज्यन्ते। छत्तीसगढक्षेत्रे एते मेलापकाः अतिप्रसिद्धाः सन्ति।



अन्यानि अपि अनेकानि पर्वाणि छत्तीसगढराज्ये सोत्साहम् आयोजितानि भवन्ति। यथा खमरछठ (हलषष्ठी) अक्षयतृतीया (अक्ति) आँवलानवमी, गौरागौरी इत्यादीनि। सर्वेषु उत्सवेषु राज्यस्य संस्कृतिः, लोकपरम्परा, जनजीवनं च प्रतिबिम्बितानि भवन्ति।

सम्पन्ना खलु इयं भूमिः उत्सवैः।



## शब्दार्थाः

उत्सवानाम् = उत्सवों का। अमावस्याम् = अमावस्या में। उपकरणानि = औजार। पशूनाम् = पशुओं का। पचन्ति = पकाते हैं। सानन्दमुपोष्य = आनन्दपूर्वक उपवास करके । वितरन्ति = वितरण करते हैं (बाँटते हैं)। बलीवर्दाः = बैल। इत्युच्यते = (इति + उच्यते) ऐसा कहते हैं। गीतवाद्याभिः = गीतवाद्य यंत्रों से। भूषयन्ति = सजाते हैं। प्रचलति = प्रचलित है। पूर्णिमायां = पौर्णमासी में। लोकभाषायाम् = लोक भाषा में। प्रतिबिम्बितानि = प्रतिबिम्बित होते हैं।

## अभ्यासः

**प्रश्न 1. निम्नलिखित प्रश्नों के उत्तर लिखिए –**

(क) जनाः हरेली उत्सवं कस्मिन् मासे मन्यन्ते ?

(ख) स्त्रियः तीजापर्वणि कस्य दीर्घायुष्यं कामयन्ति ?

(ग) के यवाङ्कुराः समृद्धेः प्रतीकभूताः सन्ति ?

(घ) का एकादशी जेठौनी उच्यते ?

(ड.) छेरछेरापर्वणि बालकाः प्रतिगृहं गत्वा किं कथयन्तः नवान्नानि याचन्ते ?

**प्रश्न 2. रिक्त स्थानों की पूर्ति कीजिए –**

PSC2PH

(क) पशूनां कृते गोधूमनिर्मितां ............................................ पाचयन्ति।

(ख) तीजापर्व भाद्रपदस्य ............................................ उत्सवोऽयं भवति।

(ग) देव्याः दुर्गायाः विसर्जनोत्सवः .................................. इति उच्यते।

(घ) छत्तीसगढक्षेत्रस्य ग्रामे–ग्रामे ................................................................ आयोज्यन्ते।

**प्रश्न 3. निम्नांकित शब्दों के वाक्य बनाइए (संस्कृत में) –**

श्रावणमासस्य, तीजापर्व, जेठौनीपर्व, छेरछेरापर्व।

❖❖❖